श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.19- चतुर्थ सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथैकोनविं(म्)शोऽध्यायः ॥**

### श्रीभगवानुवाच

**यो विद्याश्रुतसम्पन्न, आत्मवान् नानुमानिकः ।**
**मायामात्रमिदं(ञ्) ज्ञात्वा, ज्ञानं(ञ्) च मयि सं(न्)न्यसेत् ॥ 1॥**

**विद्या+श्रुत+सम्पन्न**

**ज्ञानिनस्त्वहमेवेष्टः(स्), स्वार्थो हेतुश्च सं(म्)मतः।**
**स्वर्गश्चैवापवर्गश्च, नान्योऽर्थो मदृते प्रियः ॥ 2॥**

**ज्ञानिनस्+ त्व+हमेवेष्टः(स्), स्वर्गश् + चैवा+पवर्गश्च**

**ज्ञानविज्ञानसं(म्)सिद्धाः(फ्), पदं(म्) श्रेष्ठं(वँ) विदुर्मम ।**
**ज्ञानी प्रियतमोऽतो मे, ज्ञानेनासौ बिभर्ति माम् ॥ 3॥**

**ज्ञानविज्ञा+ नसं(म्)सिद्धाः(फ्)**

तपस्तीर्थं(ञ्) जपो दानं(म्), पवित्राणीतराणि च ।

नालं(ङ्) कुर्वन्ति तां(म्) सिद्धिं(यँ), या ज्ञानकलया कृता ॥ 4॥

पवित्राणी+तराणि

तस्माज्ज्ञानेन सहितं(ञ्), ज्ञात्वा स्वात्मानमुद्धव ।

ज्ञानविज्ञानसम्पन्नो, भज मां(म्) भक्तिभावितः ॥ 5॥

स्वात्मा+नमुद्धव

ज्ञानविज्ञानयज्ञेन, मामिष्ट्वाऽऽत्मानमात्मनि ।

सर्वयज्ञपतिं(म्) मां(वँ) वै, सं(म्)सिद्धिं(म्) मुनयोऽगमन् ॥ 6॥

ज्ञानविज्ञा+नयज्ञेन,

मामिष्ट्वाऽऽत्मा+नमात्मनि

त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो,

मायान्तराऽऽपतति नाद्यपवर्गयोर्यत् ।

जन्मादयोऽस्य यदमी तव तस्य किं(म्) स्यु-

राद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये ॥ 7॥

त्वय्युद् + धवाश्रयति, मायान्तराऽऽ+ पतति, ना+द्यपवर्ग+योर्यत्

राद्यन् + तयोर् + यद+ सतोऽस्ति

उद्धव उवाच

ज्ञानं(वँ) विशुद्धं(वँ) विपुलं(यँ) यथैतद् -

वैराग्यविज्ञानयुतं(म्) पुराणम् ।

आख्याहि विश्वेश्वर विश्वमूर्ते,

त्वद्भक्तियोगं(ञ्) च महद्विमृग्यम् ॥ 8॥

वैराग्य+विज्ञा+नयुतं(म्),

त्वद्+ भक्ति+योगं(ञ्), महद् + विमृग्यम्

तापत्रयेणाभिहतस्य घोरे,

सं(न्)तप्यमानस्य भवाध्वनीश ।

पश्यामि नान्यच्छरणं(न्) तवाङ्घ्रि-

द्वन्द्वातपत्रादमृताभिवर्षात् ॥ 9॥

तापत्रयेणा+ भिहतस्य, द्वन्द्वा+तपत्रा+दमृता+भिवर्षात्

दष्टं(ञ्) जनं(म्) सं(म्)पतितं(म्) बिलेऽस्मिन्,

कालाहिना क्षुद्रसुखोरुतर्षम् ।

समुद्धरैनं(ङ्) कृपयाऽऽपवर्ग्यैर्-

वचोभिरासिञ्च महानुभाव ॥ 10॥

क्षुद्र+सुखो+रुतर्षम्, समुद्+ धरैनं(ङ्)

श्रीभगवानुवाच

इत्थमेतत् पुरा राजा, भीष्मं(न्) धर्मभृतां(वँ) वरम् ।

अजातशत्रुः(फ्) पप्रच्छ, सर्वेषां(न्) नोऽनुशृण्वताम् ॥ 11॥

नोऽनु+शृण्वताम्

निवृत्ते भारते युद्धे, सुहृन्निधनविह्वलः ।

श्रुत्वा धर्मान् बहून् पश्चान्- मोक्षधर्मानपृच्छत॥ 12॥

सुहृन्+ निधन+विह्वलः, मोक्षधर्मा+नपृच्छत

तानहं(न्) तेऽभिधास्यामि, देवव्रतमुखाच्छ्रुतान् ।

ज्ञानवैराग्यविज्ञान- श्रद्धाभक्त्युपबृं(म्)हितान् ॥ 13॥

देव+व्रतमु+खाच्छ्रुतान् , श्रद्धा+भक्त्यु+पबृं(म्)हितान्

नवैकादश पं(ञ्)च त्रीन्, भावान् भूतेषु येन वै ।

ईक्षेताथैकमप्येषु, तज्ज्ञानं(म्) मम निश्चितम् ॥ 14॥

ईक्षेता+थैक+मप्येषु,

एतदेव हि विज्ञानं(न्), न तथैकेन येन यत् ।
स्थित्युत्पत्त्यप्ययान् पश्येद्, भावानां(न्) त्रिगुणात्मनाम् ॥ 15॥

स्थित्युत् + पत्त्यप् + ययान्, त्रिगुणात् + मनाम्

आदावन्ते च मध्ये च, सृज्यात् सृज्यं(यँ) यदन्वियात् ।
पुनस्तत्प्रतिसं(ङ्)क्रामे, यच्छिष्येत तदेव सत् ॥ 16॥

पुनस्तत् + प्रतिसं(ङ्)क्रामे

श्रुतिः(फ्) प्रत्यक्षमैतिह्य- मनुमानं(ञ्) चतुष्टयम् ।
प्रमाणेष्वनवस्थानाद्, विकल्पात् स विरज्यते ॥ 17॥

प्रमाणेष्व+ नवस्थानाद्

कर्मणां(म्) परिणामित्वा- दाविरि(ञ्)चादमं(ङ्)गलम्।
विपश्चिन्नश्वरं(म्) पश्ये- ददृष्टमपि दृष्टवत् ॥ 18॥

दाविरि(ञ्)चा+ दमं(ङ्)गलम्, विपश्चिन्+ नश्वरं(म्)

भक्तियोगः(फ्) पुरैवोक्तः(फ्), प्रीयमाणाय तेऽनघ ।
पुनश्च कथयिष्यामि, मद्भक्तेः(ख्) कारणं(म्) परम् ॥ 19॥

श्रद्धामृतकथायां(म्) मे, शश्वन्मदनुकीर्तनम् ।
परिनिष्ठा च पूजायां(म्), स्तुतिभिः(स्) स्तवनं(म्) मम ॥ 20॥

श्रद्धामृ+तकथायां(म्), शश्वन् + मदनुकीर्तनम्

आदरः(फ्) परिचर्यायां(म्), सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका, सर्वभूतेषु मन्मतिः ॥ 21॥

सर्वाङ्गै+रभिवन्दनम्, मद्भक्त+ पूजाभ् + यधिका

मदर्थेष्वं(ङ्)गचेष्टा च, वचसा मद्गुणेरणम् ।
मय्यर्पणं(ञ्) च मनसः(स्), सर्वकामविवर्जनम् ॥ 22॥

मदर्थेष्वं(ङ्)+ गचेष्टा, सर्वका+ मविवर्जनम्

मदर्थेऽर्थपरित्यागो, भोगस्य च सुखस्य च ।

इष्टं(न्) दत्तं(म्) हुतं(ञ्) जप्तं(म्), मदर्थं(यँ) यद् व्रतं(न्) तपः ॥ 23॥

मदर्थेऽर्थ+परित्यागो

एवं(न्) धर्मैर्मनुष्याणा- मुद्धवात्मनिवेदिनाम् ।

मयि सं(ञ्)जायते भक्तिः(ख्), कोऽन्योऽर्थोऽस्यावशिष्यते ॥ 24॥

धर्मैर् + मनुष्याणा, मुद् + धवात्+ मनिवेदिनाम्,

कोऽन्योऽर्थोऽस् + यावशिष्यते

यदाऽऽत्मन्यर्पितं(ञ्) चित्तं(म्), शान्तं(म्) सत्त्वोपबृं(म्)हितम्।

धर्मं(ञ्) ज्ञानं(म्) सवैराग्य- मैश्वर्यं(ञ्) चाभिपद्यते ॥ 25॥

यदाऽऽत्+ मन्यर्पितं(ञ्), सत्त्वो+ पबृं(म्)हितम्

यदर्पितं(न्) तद् विकल्पे, इन्द्रियैः(फ्) परिधावति ।

रजस्वलं(ञ्) चासन्निष्ठं(ञ्), चित्तं(वँ) विद्धि विपर्ययम् ॥ 26॥

चासन्+ निष्ठं(ञ्)

धर्मो मद्भक्तिकृत् प्रोक्तो, ज्ञानं(ञ्) चैकात्म्यदर्शनम् ।

गुणेष्वसं(ङ्)गो वैराग्य- मैश्वर्यं(ञ्) चाणिमादयः ॥ 27॥

चैकात्म्य+दर्शनम्, गुणेष्व+ सं(ङ्)गो

उद्धव उवाच

यमः(ख्) कतिविधः(फ्) प्रोक्तो, नियमो वारिकर्शन ।

कः(श्) शमः(ख्) को दमः(ख्) कृष्ण, का तितिक्षा धृतिः(फ्) प्रभो ॥ 28॥

किं(न्) दानं(ङ्) किं(न्) तपः(श्) शौर्यं(ङ्), किं(म्) सत्यमृतमुच्यते ।

कस्त्यागः(ख्) किं(न्) धनं(ञ्) चेष्टं(ङ्), को यज्ञः(ख्) का च दक्षिणा ॥ 29॥

सत्य+मृत+मुच्यते

पुं(म्)सः(ख्) किं(म्)स्विद् बलं(म्) श्रीमन्, भगो लाभश्च केशव ।
का विद्या ह्रीः(फ्) परा का श्रीः(ख्), किं(म्) सुखं(न्) दुःखमेव च ॥ 30॥

कः(फ्) पण्डितः(ख्) कश्च मूर्खः(ख्), कः(फ्) पन्था उत्पथश्च कः ।
कः(स्) स्वर्गो नरकः(ख्) कः(स्)स्वित्, को बन्धुरुत किं(ङ्) गृहम् ॥ 31॥

क आढ्यः(ख्) को दरिद्रो वा, कृपणः(ख्) कः(ख्) क ईश्वरः ।
एतान् प्रश्नान् मम ब्रूहि, विपरीतां(म्)श्च सत्पते ॥ 32॥

विपरी+ तां(म्)श्च

श्रीभगवानुवाच

अहिं(म्)सा सत्यमस्तेय- मसं(ङ्)गो ह्रीरसं(ञ्)चयः।
आस्तिक्यं(म्) ब्रह्मचर्यं(ञ्) च, मौनं(म्) स्थैर्यं(ङ्) क्षमाभयम् ॥ 33॥

ह्रीर+ सं(ञ्)चयः

शौचं(ञ्) जपस्तपो होमः(श्), श्रद्धाऽऽतिथ्यं(म्) मदर्चनम् ।
तीर्थाटनं(म्) परार्थेहा, तुष्टिराचार्यसेवनम् ॥ 34॥

तुष्टिरा+चार्य+सेवनम्

एते यमाः(स्) सनियमा, उभयोर्द्वादश स्मृताः ।
पुं(म्)सामुपासितास्तात, यथाकामं(न्) दुहन्ति हि ॥ 35॥

उभयोर् + द्वादश,

पुं(म्)सा+मुपासितास् + तात

शमो मन्निष्ठता बुद्धेर्- दम इन्द्रियसं(यँ)यमः।
तितिक्षा दुःखसं(म्) मर्षो, जिह्वोपस्थजयो धृतिः ॥ 36॥

मन्+ निष्ठता,

जिह्वो+ पस्थ+ जयो

दण्डन्यासः(फ्) परं(न्) दानं(ङ्), कामत्यागस्तपः(स्) स्मृतम् ।
स्वभावविजयः(श्) शौर्यं(म्), सत्यं(ञ्) च समदर्शनम् ॥ 37॥

कामत्या+ गस्तपः(स्)

ऋतं(ञ्) च सूनृता वाणी, कविभिः(फ्) परिकीर्तिता ।
कर्मस्वसं(ङ्)गमः(श्) शौचं(न्), त्यागः(स्) सं(न्)न्यास उच्यते ॥ 38॥

कर्मस्+ वसं(ङ्)+ गमः(श्)

धर्म इष्टं(न्) धनं(न्) नृणां(यँ), यज्ञोऽहं(म्) भगवत्तमः ।
दक्षिणा ज्ञानसन्देशः(फ्), प्राणायामः(फ्) परं(म्) बलम् ॥ 39॥

भगो म ऐश्वरो भावो, लाभो मद्भक्तिरुत्तमः ।
विद्याऽऽत्मनि भिदाबाधो, जुगुप्सा ह्रीरकर्मसु ॥ 40॥

मद्+ भक्ति+ रुत्तमः

श्रीर्गुणा नैरपेक्ष्याद्याः(स्), सुखं(न्) दुःखसुखात्ययः ।
दुःखं(ङ्) कामसुखापेक्षा, पण्डितो बन्धमोक्षवित् ॥ 41॥

नै+ रपेक्ष्+ याद्याः(स्)

मूर्खो देहाद्यहं(म्)बुद्धिः(फ्), पन्था मन्निगमः(स्) स्मृतः ।
उत्पथश्चित्तविक्षेपः(स्), स्वर्गः(स्) सत्त्वगुणोदयः ॥ 42॥

मन्+ निगमः(स्), उत्पथश्+ चित्त+ विक्षेपः(स्)

नरकस्तमउन्नाहो, बन्धुर्गुरुरहं(म्) सखे ।
गृहं(म्) शरीरं(म्) मानुष्यं(ङ्), गुणाढ्यो ह्याढ्य उच्यते ॥ 43॥

बन्धुर्+ गुरु+ रहं(म्)

दरिद्रो यस्त्वसन्तुष्टः(ख्), कृपणो योऽजितेन्द्रियः ।
गुणेष्वसक्तधीरीशो, गुणसं(ङ्)गो विपर्ययः ॥ 44॥

यस्त्व+ सन्तुष्टः(ख्), गुणेष्व+ सक्तधी+ रीशो

एत उद्धव ते प्रश्नाः(स्), सर्वे साधु निरूपिताः ।

किं(वँ) वर्णितेन बहुना, लक्षणं(ङ्) गुणदोषयोः ।

गुणदोषदृशिर्दोषो, गुणस्तूभयवर्जितः ॥ 45॥

गुणदो+ षदृशिर्+ दोषो, गुणस्तू+ भय+ वर्जितः

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायामेकादशस्कन्धे एकोनविं(म्)शोऽध्यायः॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

